कामदेवः । इत्यमरः । १ । १ । २७ ॥ ( यथा, कुमारसम्भवे । २ । ६४ ।
"सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा ॥")

पुष्पनिघः, पुं, (पुष्पं निघति चुम्बतीति । पुष्प+निघ+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । ) भ्रमरः । इति शब्दचन्द्रिका ॥

पुष्पन्धयः, पुं, (पुष्पं धयतीति । धेट पाने+खश् । "अरुर्द्विषदजन्तस्य मुम् ।"६।३।६७। इति मुम् ।) भ्रमरः । इति राजनिर्घण्टः ॥ पुष्परसपानकर्त्तरि, त्रि । पुष्पशब्दाद्धेटधातोः कर्त्तरि खश्प्रत्ययनिष्पन्नत्वात् । इति मुग्धबोधव्याकरणम् ॥

पुष्पपथः, पुं, (पुष्पस्य स्त्रीरजसः पन्थाः सरणिः ।) योनिः । इति त्रिकाण्डशेषः ॥

पुष्पपुरं, क्ली, ( पुष्पवत् पाटलिपुष्पयुक्तं तद्वत् शोभाजनकं वा पुरम् ।) पाटलिपुत्त्रनगरम् । इति भूरिप्रयोगः ॥ (यथा, रघौ । ६ । २४ ।
"अनेन चेदिच्छसि गृह्यमाणं
पाणिं वरेण्येन कुरु प्रवेशे ।
प्रासादवातायनसंश्रितानां
नेत्रोत्सवं पुष्पपुराङ्गनानाम् ॥"
"पुष्पपुराङ्गनानां पाटलिपुराङ्गनानाम् ।" इति तट्टीकायां मल्लिनाथः ॥)

पुष्पफलः, पुं, ( पुष्पयुक्तं फलं यस्य । ) कुष्माण्डः । इति शब्दमाला ॥ कपित्थः । इत्यमरः ।२।४।२१॥

पुष्पमासः, पुं, ( पुष्पाणां मासः पुष्पप्रधानो मासो वा । ) वसन्तः । इति राजनिर्घण्टः ॥ ( यथा, हरिवंशे । ५६ । ४ ।
"मासान् वै पुष्पमासादीन् गणयन्तु मम स्त्रियः ।
परिणामे तु गर्भस्य शेषं ज्ञास्यामहे वयम् ॥")

पुष्परक्तः, पुं, ( पुष्पे पुष्पावच्छेदे रक्तं रक्तवर्णमस्य । यद्वा, पुष्पं रक्तमस्य । ) सूर्य्यमणिवृक्षः । इति शब्दचन्द्रिका ॥

पुष्परसः, पुं, ( पुष्पाणां रसः । ) मकरन्दः । इत्यमरः । २ । ४ । १७ ॥ ( यथा, भावप्रकाशे क्वाथाधिकारे ।
"पलं पलश्चापि कटुत्रयस्य
तथा चतुर्जातफलं विचूर्ण्य ।
पलानि षट् पुष्परसस्य चापि
विनिःक्षिपेत्तच्च विमिश्रयेच्च ॥")

पुष्परसाह्वयं, क्ली, ( पुष्परस इत्याह्वय आख्या यस्य । ) मधु । इति राजनिर्घण्टः ॥

पुष्परागः, पुं, ( पुष्पस्येव रागो वर्णोऽस्य । ) मणिविशेषः । पुखराज इति भाषा । तत्पर्य्यायः । मञ्जुमणिः २ वाचस्पतिवल्लभः ३ । इति भावप्रकाशः ॥ पीतः ४ पीतस्फटिकः ५ पीतरक्तः ६ पीताश्मा ७ गुरुरत्नम् ८ पीतमणिः ९ पुष्पराजः १० ॥ (यथा, रघौ ।१८।३२।
"तस्य प्रभा निर्ज्जितपुष्परागं
पौष्यांतिथौ पुष्यमसूत पत्नी ॥"
"प्रभया निर्ज्जितः पुष्परागो मणिविशेषो येन ।" इति तट्टीकायां मल्लिनाथः ॥) अस्य गुणाः । अम्लत्वम् । शीतत्वम् । वातनाशित्वम् । दीपनत्वञ्च ॥ * ॥ तस्य धारणगुणः । आयुःश्रीप्रज्ञाकारित्वम् ॥ * ॥ तस्य लक्षणं यथा,—
"सुच्छायपीतगुरुगात्रसुरङ्गशुद्धं
स्निग्धञ्च निर्म्मलमतीव सुवृत्तशीतम् ।
यः पुष्परागसकलं कलयेदमुष्य
पुष्णाति कीर्त्तिमतिशौर्य्यसुखायुरर्थान् ॥" *॥
तस्य कुलक्षणं यथा,—
"कृष्णविन्दङ्कितं रूक्षं धवलं मलिनं लघु ।
विच्छायं शर्कराधारं पुष्परागं सदोषकम् ॥"
तस्य परीक्षालक्षणं यथा, राजनिर्घण्टे ।
"घृष्टो विकाशयेत् पुष्परागमधिकमात्मीयम् ।
न खलु पुष्परागो जात्यतया परीक्षकैरुक्तः ॥"
तस्योत्पत्त्यादि यथा,—
सूत उवाच ।
"पतिता या हिमाद्रौ हि त्वचस्तस्य सुरद्विषः ।
प्रादुर्भवन्ति ताभ्यस्तु पुष्परागा महागुणाः ॥
आपीतपाण्डुरुचिरः पाषाणः पुष्परागसंज्ञस्तु ।
कौरुण्टकनामा स्यात् स एव यदि लोहितापीतः ॥
आलोहितस्तु पीतः स्वच्छः काषायकः स एवोक्तः ।
आनीलशुक्लवर्णः स्निग्धः सोमालकः स्वगुणैः ॥
अत्यन्तलोहितो यः स एव खलु पद्मरागसंज्ञः स्यात् ।
अपि चेन्द्रनीलसंज्ञः स एवं कथितः सुनीलः सन् ॥
मूल्यं वैदुर्य्यमणेरिव गदितं ह्यस्य रत्नशास्त्रविदा ।
धारणफलञ्च तद्वत् किन्तु स्त्रीणां सुतप्रदो भवति ॥"
इति गारुडे ७५ अध्यायः ॥ * ॥
प्रकारान्तरम् ।
"शणपुष्पसमः कान्त्या स्वच्छभावस्तु चिक्कणः ।
पुत्त्रदो धनदः पुण्यः पुष्परागमणिर्म्मतः ॥
दैत्यधातुसमुद्भूतः पुष्परागमणिर्द्विधा ।
पद्मरागाकरे कश्चित् कश्चित्तार्क्ष्योपलाकरे ॥
ईषत्पीतच्छविच्छायास्वच्छं कान्त्या मनोहरम् ॥
पुष्परागमिति प्रोक्तं रङ्गसोममहीभुजा ॥
ब्रह्मादिजातिभेदेन तद्विज्ञेयं चतुर्विधम् ।
छाया चतुर्व्विधा तस्य सिता पीता सितासिता ॥"
इति युक्तिकल्पतरुः ॥

पुष्परेणुः, पुं, ( पुष्पाणां रेणुः । ) परागः । इति शब्दरत्नावली ॥ (यथा, रघौ । १ । ३८ ।
"सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः ।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ॥")

पुष्परोचनः, पुं, ( पुष्पं रोचनेवास्य । पुष्पेषु रोचनः रुचिप्रदो वा । ) नागकेशरः । इति त्रिकाण्डशेषः ॥

पुष्पलावः, पुं, ( पुष्पं लुनाति अवचिनोति मालादार्थमिति । पुष्प+लू+"कर्म्मण्यण् ।" ३।२।१। इत्यण् ।) मालाकारः । इति जटाधरः ॥ (स्त्रियां ङीष् । मालाकारपत्नी । यथा, मेघदूते । २८ ।
"गण्डस्वेदापनयनरुजा क्लान्तकर्णोत्पलानां
छायादानक्षणपरिचितः पुष्पलावीमुखानाम् ॥")

पुष्पलावी, [ न् ] पुं, ( पुष्पं लुनातीति । लूञ् छिदि+णिनिः । ) मालाकारः । इति हेमचन्द्रः । ३ । ५६४ ॥

पुष्पलिट्, [ ह् ] पुं, ( पुष्पं लेढ़ीति । लिह+क्विप् । ) भ्रमरः । इत्यमरः । २ । ५ । २९ ॥

पुष्पवती, स्त्री, ( पुष्पमस्त्यस्या इति । पुष्प+मतुप् । मस्य वः । ततो ङीप् । ) रजस्वला । इत्यमरः । २ । ६ । २० ॥ (यदुक्तं,—
"कालमेही भवेत् सोऽपि पुष्पवत्याश्च धर्षणात् ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८५ । १२ ।
"पुष्पवत्यामुपस्पृश्य त्रिरात्रोपषितो नरः ।
गोसहस्रफलं लब्ध्वा पुनाति स्वकुलं नृप ! ॥" )
पुष्पविशिष्टे, त्रि ॥ (यथा, रामायणे ।२।९४।१०।
"पुष्पवद्भिः फलोपेतैश्छायावद्भिर्मनोरमैः ॥")

पुष्पवन्तौ, पुं, ( पुष्प विकासे+भावे घञ् । पुष्पो विकासोऽस्त्यनयोरिति । पुष्प+मतुप् । मस्य वः ।) एकयोक्त्या चन्द्रसूर्य्यौ । इत्यमरः ।१।४।१०॥ "एकया उक्त्या अपृथग्वचनेन चन्द्रार्कौ पुष्पवच्छब्दवाच्यौ न तु पुष्पवानिन्दुः सूर्य्यो वेत्यभिधीयते । साङ्गे । एकयोक्त्येति भिन्नप्रयोगे नेत्यर्थः । अतएव द्व्यर्थकत्वात् सदा द्विवचनमित्यर्थः । पुष्पो विकाशस्तद्योगाद्धेतुः । पुष्पवन्तशब्दोऽदन्तो रूढ़ोऽपि रविशशिनौ पुष्पवन्ताख्याविति नाममाला ।" इति तट्टीकायां भरतः ॥

पुष्पवाटी, स्त्री, ( पुष्पाणां वाटी । ) पुष्पोद्यानम् । फुलवागान इति भाषा ॥ यथा, हेमचन्द्रः । ४ । १७९ ॥
"वाटी पुष्पादृक्षचास्रौ क्षुद्रारामः प्रसे- [विका ॥"

पुष्पवाहनः, पुं, (पुष्पं पुष्करं वाहनमिव यस्य । ) पुष्करराजः । यथा, अग्निपुराणे ।
"राजा यथोक्तञ्च पुनरकरोत् पुष्पवाहनः ।
विभूतिद्वादशीं कृत्वा स गतः परमां गतिम् ॥"

पुष्पशकटी, स्त्री, आकाशवाणी । यथा,—
"चित्रोक्तिः पुष्पशकटी दैवप्रश्न उपश्रुतिः ॥"
इति त्रिकाण्डशेषः ॥

पुष्पशरः, पुं, ( पुष्पाणि शरा यस्य । ) कन्दर्पः । कुसुमेषुदर्शनात् ॥

पुष्पशरासनः, पुं, ( पुष्पं शरासनं धनुर्यस्य । ) कन्दर्पः । पुष्पधन्वदर्शनात् ॥

पुष्पशून्यः, पुं, ( पुष्पेण शून्यः । ) उदुम्बरः । इति राजनिर्घण्टः ॥ कुसुमरहिते, त्रि ॥

पुष्पसमयः, पुं, ( पुष्पाणां समयः । ) वसन्तः । इत्यमरः ॥

पुष्पसारः, पुं, ( पुष्पस्य सारः । ) पुष्पद्रवः । इति राजनिर्घण्टः ॥ ( पुष्पश्रेष्ठे, त्रि । यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।
"पुष्पसारां नन्दिनीञ्च तुलसीं कृष्णजीवनीम् ॥")